लोकप्रियसाहित्यग्रन्थमाला-55

# भारतभूप्रशस्तिः

प्रधानसम्पादकः
प्रो. परमेश्वरनारायणशास्त्री
कुलपतिः

प्रणेता
वाचस्पतिः भुवनेश्वरकरशर्मा

राष्ट्रियसंस्कृतसंस्थानम्
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः
मानितविश्वविद्यालयः )
नवदेहली

# पुरोवाक्

संस्कृतभाषा यथा चिरपुरातनी सनातनी तथैव प्रतियुगं पुनःपुनर्जायमाना उषा इव नवविच्छित्तिं नूतनां च छविमाविर्भावयन्ती वरीवृत्यते, अभिनवप्रभाभास्वरं प्रभातं विभावयितुं क्षमा इदानीमपि स्वे महिम्नि प्रतिष्ठिता चास्त इति जानन्त्येव सर्वे सुरभारतीसमुपासकाः। वस्तुतः आधुनिके काले अपूर्वैव समृद्धिर्दरीदृश्यते संस्कृतरचनायाः। साम्प्रतिकोऽयं समयः संस्कृत-साहित्यस्य किमपि स्वर्णयुगम् इति वक्तुं शक्यम्। अस्मिन् किल काले नैके प्रौढा विदग्धास्तथा च उदीयमानास्तरुणास्तेजस्विनः पण्डिताः प्रकटयन्ति संस्कृतस्य शास्त्रवैभवं तथा च कवयन्ति परःशतं साहित्यरचनानदीष्णाः सरस्वत्याः सुपुत्रा सुकवयोऽस्यामेव भाषायाम्।

एतादृशेषु कविपण्डितेषु स्वकृतित्वेन महीयते वाचस्पतिर्भुवनेश्वरः करः। अस्य पण्डितराजकृतलहरीपञ्चकस्य अनुत्तमं व्याख्यानं विद्वत्समाजे सुप्रथितम्। अथैतस्यां प्रकाश्यमानायां भारतभूप्रशस्तौ अस्य कवितामाधुरीरसझरी किमपि कामनीयकं व्यनक्ति, स्मारयति च

**कश्चिद् वाचो रचयितुमलं श्रोतुमेवापरस्तां**
**कल्याणी ते मतिरुभयथा विस्मयं नस्तनोति।**
**नह्येकस्मिन् भवति सुभगः सन्निपातो गुणानां**
**एकः सूते कनकमुपलं तत्परीक्षाक्षमोऽन्यः।**

इति कालिदासोक्तिम्।

विदन्त्येव विज्ञा यत् प्रख्योपाख्याप्रसरसुभगं सरस्वत्यास्तत्त्वं द्विधा प्रवर्तते-अविचारितरमणीयं विचारितसुस्थं चेति। अतिप्राचीनकालादद्यावधि द्वयोरपि अनयोर्मार्गयोः संस्कृतसाहित्यसरस्वती अनिर्बाधं प्रकृष्टं च प्रवहन्ती

# विषयानुक्रमणिका


पुरोवाक् – प्रो. पी.एन.शास्त्री (कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्) viii

पूर्वाभाषः v

१. प्रथमो भागः १

२. द्वितीयो भागः २४

३. तृतीयो भागः ३१

४. चतुर्थो भागः ४१


✦✦✦

वनेवासी रामो दशमुखभगिन्याः प्रणयनेऽ-
द्भुतां याच्ञां नाकर्णयदथ भृशं प्रार्थितवतीम्।
इमां विग्रां सौमित्रिरकृत ततोऽजायत महा-
ननर्थो यः सीतापहरणविधौ बीजमवपत्॥२४॥

भगिन्या वृत्ताकर्णनकुपितचित्तो दशमुखो
ऋषेर्वेषं धृत्वा कृतकपटनीत्याऽनयदितः।
सतीं देवीं सीतां करुणमृदतीमात्मनगरीं
यदा रामः सौमित्रिरपि हरिणं हाऽन्वसरताम्॥२५॥

बहुक्लेशै रामोऽकृत बहुलमन्वेषणमतः-
परं मित्रं सुग्रीवमधिगतवान् बालिनमहन्।
हनूमत्साहाय्यैर्जनकतनयायाः स्थितिमरं
विदन् लङ्कामापत् सह सहचरैर्वानरवरैः॥२६॥

महाघोरे संख्येऽम्रियत बहुसंख्योऽसुरगणो
महावीरग्राम प्रथितगरिमो रावणिरपि।
जुहाव स्वप्राणांस्तदनु स च लङ्कापतिरथो
ननादोच्चैर्भेरी जयतु जयताद्राममहिमा॥२७॥

महर्षिर्व्यासश्चारचयत महाभारतमपि
सदा सत्यं न्यायो जगति जयतीत्यत्र भणितम्।
तदीया गीता गौरवमधिगता दर्शनदृशा
यतोऽध्यात्मं ब्रह्मात्मनियतसुकर्मादि दिशते॥२८॥

पुनर्यन्नेहास्ति क्वचिदपि न तद् वर्तत इती-
दृशी ख्याता तस्य प्रचलति दृढोक्तिर्बलवती
विभर्ति ग्रन्थोऽयं खलु विविधवृत्तैर्विरचितान्
गुरून् लक्षं श्लोकानिति समुदितं लेखकवरैः॥२९॥

# राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः
मानितविश्वविद्यालयः )

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

ई-मेल : rsks@nda.vsnl.net.in

वेबसाईट : www.sanskrit.nic.in

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
ई-मेल : rsks@nda.vsnl.net.in
वेबसाईट : www.sanskrit.nic.in